यमाने दण्डप्रकारकदण्डाश्रयप्रत्यक्षेऽपि पुरुषो न दण्डांशे मुख्यविशेष्यतया भासते अपि तु चक्रव्यूहवत् दण्डपुटितः पुरुषः पुरुषपुटितश्च दण्डो भासते इति कल्प्यते । न च तथापि योगजधर्माधीनविशिष्टज्ञानं प्रति विशेषणज्ञानस्याहेतुत्वनये सामान्यज्ञानं विनाऽपि जायमाने सामान्यप्रकारकसामान्याश्रयमुख्यविशेष्यकप्रत्यक्षे व्यभिचारः । योगजविशिष्टज्ञानं प्रति विशेषणज्ञानस्य हेतुत्वनयेऽपि योगजधर्म्मेण सामान्यतदाश्रये उभयविषयकनिर्विकल्पकं जनयित्वा जनिते सामान्यप्रकारकसामान्याश्रयमुख्यविशेष्यकप्रत्यक्षे व्यभिचार इति वाच्यं योगजधर्मजन्यतावच्छेदकतज्जात्यवच्छिन्नान्यत्वेन प्रत्यक्षविशेषणात् । तादृशयोगजज्ञाने सामान्याश्रयमुख्यविशेष्यतया भाने मानाभावाच्च । अपि च चक्रव्यूहवत् स्वप्रकारीभूतसामान्ये प्रकारीभूयैव भासते लाघवात्तथैव कल्पनात् । अत एव कालिकादिसम्बन्धेन स्वरूपतो घटत्वस्मरणानन्तरं विशेष्ये विशेषणमिति रीत्या कालिकादिसम्बन्धेनैव घटत्वप्रकारकं घटवदित्याकारकोपनीतभानं जायते न तु समवायसम्बन्धेन घटत्वप्रकारकमित्युक्तावेव व्यभिचारवारणसम्भवात् किं जात्यादिसामान्यलक्षणायाः कार्यतावच्छेदके स्वरूपतः प्रकारताघटितमुख्यविशेष्यत्वप्रवेशेन । न च तथाप्यत्र घटत्वमिति घटत्वविशेष्यकस्मरणोत्तरं जायमाने विशेष्ये विशेषणमिति रीत्या घटवदिदमित्याद्युपनीतभाने व्यभिचारवारणाय तदवश्यं निवेशनीयमिति वाच्यं स्वरूपतो घटत्वविशिष्टबुद्धिं प्रति स्वरूपतो विशेषणीभूतघटत्वविषयकज्ञानस्य हेतुतया तादृशस्मरणोत्तरं तादृशोपनीतभानासम्भवात् घटत्वत्वघटकतयैव स्वरूपतो घटत्वज्ञानाभ्युपगमेन व्यभिचारस्यापि विरहादित्यस्मत्कृतपूर्वपक्षोऽपि निरस्तः । घटवदिति स्मरणोत्तरं जायमाने परम्परासम्बन्धेन घटत्वप्रकारकमानसोपनीतभाने यथोक्तरीत्या योगजधर्मजन्ये घटत्वप्रकारकघटविशेष्यकप्रत्यक्षे च व्यभिचारवारणाय तत्प्रवेशस्यावश्यकत्वात् । एतेनाभावत्वाद्यखण्डोपाधिरूपसामान्यलक्षणाया अपि कार्य्यकारणभावो व्याख्यातः जात्यखण्डोपाध्यतिरिक्तपदार्थज्ञानञ्च न प्रत्यासत्तिरिति सामान्यपदार्थनिर्वचनावसर एव प्रतिपादितं नन्वेवंरूपेण कार्यकारणभावे जातित्वरूपेणैकजातिमात्रप्रकारकज्ञानानन्तरं जातित्वावच्छिन्नजातिप्रकारकनिखिलजात्या एव प्रत्यक्षं कथं स्याज्जात्यन्तराश्रयस्य ज्ञानप्रकारीभूतजातिव्यक्तेराश्रयत्वाभावात् स्वरूपतो घटत्वादिप्रकारकत्वस्य कार्यतावच्छेदकत्वाच्चेति चेन्न जातित्वरूपेण जातिप्रकारकलौकिकप्रत्यक्षदशायामनन्ततो निर्द्धर्मितावच्छेदकस्यापि परम्परासम्बन्धेन जातित्वघटकनित्यत्वादिघटकीभूताभावत्वाद्यखण्डोपाधिप्रकारकज्ञानस्यावश्यकत्वात् तत एव सामान्यज्ञानात् जातित्वावच्छिन्नजातिमत्त्वरूपेण निखिलजात्याश्रयस्य साक्षात्कारः जात्यन्तराश्रयस्यापि परम्परासम्बन्धेन तदाश्रयत्वात् । यत्र जातित्वरूपेण यत्किञ्चित् जातिप्रकारकशाब्दस्मृत्यादिधीस्तत्रापि मध्ये परम्परासम्बन्धेन ध्वंसत्वादिप्रकारकमानसोपनीतभानानन्तरमेव जातिमतः सर्वस्य प्रत्यक्षाभ्युपगमात् क्षणविलम्बे क्षतिविरहात् । न च परम्परासम्बन्धेन ध्वंसत्वादिकज्ञानस्यैव तत्प्रत्यासत्तित्वे ध्वंसत्ववदित्येव तज्ज्ञानं स्यात् न तु जातिमदिति सामान्यप्रकारज्ञानस्य मुख्यविशेष्ये सामान्यप्रकारकज्ञानकत्वनियमादिति वाच्यं विशेषणज्ञानार्थं जातित्वघटकसामान्यलक्षणायाः मध्ये सकलजातिविशेष्यकज्ञानस्यावश्यकत्वात् ज्ञानलक्षणयैव जातिमदिति फलस्यापि सम्भवात् द्विविधविषयस्यैवेष्टत्वात् । एवं तद्व्यक्तित्वादिरूपेण घटत्वादिज्ञानानन्तरं जायमाने तत्तद्व्यक्तित्वरूपेण घटत्वादिप्रकारकतदाश्रयप्रत्यक्षेऽपि परम्परासम्बन्धेन तद्व्यक्तित्वप्रकारकज्ञानमेव प्रत्यासत्तिरतो घटत्वादिसामान्यलक्षणायाः कार्यदिशि तदसंग्रहो न दोषाय इति भट्टाचार्य्यानुयायिनः” ।

“ज्ञानलक्षणायाः कारणतावच्छेदकन्तु सामान्यतः संसर्गावच्छिन्नघटत्वादिविषयताशालिज्ञानत्वं घटत्वादिप्रकारकज्ञानादिव घटत्वादिविषयकज्ञानादपि घटत्वादिप्रकारकोपनीतभानोदयात् । विनश्यदवस्थलौकिकसन्निकर्षजन्यघटघटत्वादिनिर्विकल्पकानन्तरमपि घटत्वादिप्रकारकप्रत्यक्षापत्तिवारणाय संसर्गावच्छिन्नेति विषयताविशेषणम् । केचित्तु ज्ञानलक्षणायाः सप्रकारकघटघटत्वादिज्ञानत्वं कारणतावच्छेदकं न चैवं विनश्यदवस्थलौकिकसन्निकर्षजन्यद्रव्यत्वादिविशिष्टबुद्ध्यात्मकघटत्वादिनिर्विकल्पकादपि प्रत्यक्षापत्तिरितिवाच्यम् इष्टत्वात् सर्वांशे निर्विकल्पकस्यैव प्रत्यासत्तित्वानभ्युपगमादित्याहुस्तदसत् तथापि सर्वांशे निर्विकल्पकादपि इष्टापत्तेः सुकरतया कारणतावच्छेदके सप्रकारकत्वस्य उपादानस्य वैयर्थ्यात् । सविशेष्यकत्वसंसर्गकविषयताशालित्वमादाय विनिगमनाविरहेण कार्य्यकारणभावस्यापत्तेः । ज्ञानलक्षणायाः कार्य्यतावच्छेद-